गृत्समद (आङ्गिरसः शौनहोत्रः पश्चाद्) भार्गवः शौनकः।इन्द्रः। त्रिष्टुप्।

**प्र घा न्वस्य महतो महानि सत्या सत्यस्य करणानि वोचम्।**

**त्रिकद्रुकेष्वपिबत्सुतस्यास्य मदे अहिमिन्द्रो जघान॥ २.०१५.०१**

नु- क्षिप्रम्। अस्य- एतस्य। महतः- महात्मनः। सत्यस्य- सत्यस्वरूपस्य। महानि- महान्ति। सत्या- सत्यानि। करणानि- कर्माणि। प्र- प्रकर्षेण। वोचम्- ब्रवीमि। त्रिकद्रुकेषु- भूर्भुवरादित्रिस्थानेषु। अपिबत्- रसमनुभवति। सुतस्य- निष्पन्नस्य। अस्य- एतस्य रसस्य। मदे- आनन्दे। इन्द्रः- परमेश्वरः। अहिम्- अप्रज्ञास्थानस्थितां दुर्वासनाम्। जघान- नाशितवान्॥१॥

**अवंशे द्यामस्तभायद्बृहन्तमा रोदसी अपृणदन्तरिक्षम्।**

**स धारयत्पृथिवीं पप्रथच्च सोमस्य ता मद इन्द्रश्चकार॥ २.०१५.०२**

अवंशे- निरालम्बे। बृहन्तम्- महत्। द्याम्- नभः। अस्तभायत्- स्थापितवान्। रोदसी- द्यावापृथिव्यौ। अन्तरिक्षम्। आ- समन्तात्। अपृणत्- अपूरयत्। सः- असौ। पृथिवीम्- भूमिम्। धारयत्- अधारयत्। पप्रथत्- प्रख्यातामकरोत्। च। सोमस्य मदे- रसानन्दे सति। ता- तानि। इन्द्रः- परमेश्वरः। चकार- अकरोत्॥२॥

**सद्मेव प्राचो वि मिमाय मानैर्वज्रेण खान्यतृणन्नदीनाम्।**

**वृथासृजत्पथिभिर्दीर्घयाथैः सोमस्य ता मद इन्द्रश्चकार॥ २.०१५.०३**

प्राचः- सनातनान् धर्मान्। सद्मेव- शरणमिव। मानैः- साक्षिप्रत्यक्षश्रुतिप्रमाणैः। वि मिमाय- निर्ममे। नदीनाम्- अपां मूलशक्तिधाराणाम्। खानि- द्वाराणि। वज्रेण- स्वायुधेन। अतृणत्- अखनत्। अयमेव प्रकृत्यापूरो योगशास्त्रे। दीर्घयाथैः- सनातनैः। पथिभिः- मार्गैः। वृथा- अनायासेन। असृजत्- अपो मूलशक्तिधाराः ससर्ज। सोमस्य ता मद इन्द्रश्चकार॥३॥

Dr. Rangaji

WEBOLIM

**स प्रवोऽळ्हून्परिगत्या दभीतेर्विश्वमधागायुधमिद्धे अग्नौ।**

**सं गोभिरश्वैरसृजद्रथेभिः सोमस्य ता मद इन्द्रश्चकार॥ २.०१५.०४**

अग्नौ- पावके सर्वभूतक्रतौ। इद्धे- उद्दीपिते। दभीतेः- दम्भगतेः। प्रवोळ्हून्- प्रवोढृन्। परिगत्य। सः- असाविन्द्रः। विश्वम्- सर्वम्। आयुधम्- तेषां प्रहरणम्। अधाक्- अधाक्षीत्। गोभिः- धेनुभिश्चिद्रश्मिभिः। अश्वैः- तुरगैः प्राणैः। रथेभिः- वाहनैर्गतिप्रतीकैः। समसृजत्- सम्यक् ससर्ज। ॥४॥

**स ईं महीं धुनिमेतोररम्णात्सो अस्नातॄनपारयत्स्वस्ति।**

**त उत्स्नाय रयिमभि प्र तस्थुः सोमस्य ता मद इन्द्रश्चकार॥ २.०१५.०५**

सः- असाविन्द्रः। ईम्- एनाम्। महीम्- महतीम्। धुनिम्- नदीम् मूलशक्तिधाराम्। एतोः- तितिर्षोरर्थे। अरम्णात्- अशमयत्। अस्नातॄन्- अमज्जतः। स्वस्ति- मङ्गळं यथा भवति तथा। अपारयत्- अतारयत्। ते- अमी उपासकाः। उत्स्नाय- उत्तीर्य। रयिम्- लक्ष्यां दैवीं सम्पदम्। अभि- आभिमुख्येन। प्र तस्थुः। ॥५॥

**सोदञ्चं सिन्धुमरिणान्महित्वा वज्रेणान उषसः सं पिपेष।**

**अजवसो जविनीभिर्विवृश्चन्सोमस्य ता मद इन्द्रश्चकार॥ २.०१५.०६**

सः- असाविन्द्रः। सिन्धुम्- नदीमाधारशक्तिधाराम्। महित्वा- स्वमहिम्ना। उदञ्चम्- उदङ्मुखीम्। अरिणात्- अकरोत्। उषसः- ज्ञानोदयदेवतायाः प्रभात्याः। अनः- शकटोपलक्षितगतिम्। सम्- सम्यक्। पिपेष- निर्मितवान्। अजवसः- वेगरहिताः शत्रुसेनाः। जविनीभिः- वेगवतीभिः स्वसेनाभिः। विवृश्चन्- नाशयन्। ॥६॥

**स विद्वाँ अपगोहं कनीनामाविर्भवन्नुदतिष्ठत्परावृक्।**

**प्रति श्रोणः स्थाद्व्य१नगचष्ट सोमस्य ता मद इन्द्रश्चकार॥ २.०१५.०७**

Dr.Ranganji

WEBOLIM

कनीनाम्- कमनीयानामपां मूलशक्तिधाराणाम्। अपगोहनम्- आवरणस्थानम्। सः- असाविन्द्रः। विद्वान्- जानाति। परावृक्- वृत्रहिंसकः सन्। आविर्भवन्- स्वात्मानं प्रकटयन्। उदतिष्ठत्- अपो मोक्तुमुदतिष्ठत्। श्रोणः- पङ्गुरगतिरिन्द्रप्रसादाल्लब्धगतिः। प्रति स्थात्- अपः प्रत्यतिष्ठत्। अनक्- प्रकटीकरोति। वि- विशेषेण। अचष्ट- अपश्यत्॥७॥

**भिनद्वलमङ्गिरोभिर्गृणानो वि पर्वतस्य दृंहितान्यैरत्।**
**रिणग्रोधांसि कृत्रिमाण्येषां सोमस्य ता मद इन्द्रश्चकार॥ २.०१५.०८**

अङ्गिरोभिः- अङ्गनशीलैरुपासकैः। गृणानः- स्तुतः। वलम्- संवरणम्। वल संवरणे। भिनत्- बिभेद। पर्वतस्य- जडप्रतीकस्य गिरेर्मेघस्य वा। हितानि- दृढानि बन्धनानि। वि ऐरत्- उद्घाटितवान्। एषाम्- एतेषां जडप्रतीकपर्वतानाम्। कृत्रिमाणि- अस्वाभाविकानि। रोधांसि- रोधनानि। रिणक्- उद्घाटितवान्।॥८॥

**स्वप्नेनाभ्युप्या चुमुरिं धुनिं च जघन्थ दस्युं प्र दभीतिमावः।**
**रम्भी चिदत्र विविदे हिरण्यं सोमस्य ता मद इन्द्रश्चकार॥ २.०१५.०९**

स्वप्नेन- स्वापेन। अभ्युप्य- संयोज्य। चुमुरिम्- वक्रयुक्तमिति दयानन्दः। अदनशीलमिति भावः। धुनिम्- कम्पनम्। च। दस्युम्- स्तेनम्। जघन्थ- हिंसितवान्। दभीतिम्- हिंसकम्। प्र आवः- प्रकर्षेण हिंसितवान्। अत्र। चित्- एव। रम्भी- आरम्भशीलः। हिरण्यम्- ज्योतिः। विविदे- ज्ञातवान् लेभे वा।॥९॥

**नूनं सा ते प्रति वरं जरित्रे दुहीयदिन्द्र दक्षिणा मघोनी।**
**शिक्षा स्तोतृभ्यो माति धग्भगो नो बृहद्वदेम विदथे सुवीराः॥ २.०१५.१०**

पूर्वं व्याख्यातम् (२.११.२१)॥१०॥

Dr. Ranganji
WEBOLIM